श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीपराङ्कुश यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीमदादिवण्शठकोपयतीन्द्र महादेशिक मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमदादिवण्शठकोपयतीन्द्र महादेशिक मङ्गळम् ॥

श्रीश्रीनिवासयतिराण्णारायणमुनीश्वरौ।
वीरराघववेदान्तयतीन्द्रमभिसंश्रये॥

कन्याज्येष्ठावतीर्णाय कारुण्यात् कमलापतेः।
आदिवण्शठकोपाख्ययतीन्द्रायास्तु मङ्गळम्॥ 1 ॥

साक्षाच्छठारिर्योगीन्द्रः समाहूय स्वनामतः।
पाञ्चजन्यादिकं यस्मै दत्तवांस्तस्य मङ्गळम्॥ 2 ॥

अहोबिले श्रीनृसिंहः प्रेषमन्त्रं स्वयं ददौ।
योगिरूपेण यस्यास्मै शठकोपाय मङ्गळम्॥ 3 ॥

भाष्यकारः पुनर्भूमौ भाष्यप्रवचनादरात्।
यद्रूपेणागतस्तस्मै शठकोपाय मङ्गळम्॥ 4 ॥

रहस्यत्रयसाराख्यराकाचन्द्रस्य वारिधिः।
वेदान्तदेशिकस्सोऽयमेवं तर्क्याय मङ्गळम्॥ 5 ॥

श्रीनृसिंहदयादत्तश्रीमदास्थानवारिधेः।
अकलङ्कः कलानाथो यस्तस्मै नित्यमङ्गळम्॥ 6 ॥

श्रीवैष्णवसमाजस्य श्रीसमाख्यातसंपदः।
कारणं योऽभवत्तस्मै शठकोपाय मङ्गळम्॥ 7 ॥

लक्ष्मीनृसिंहकरुणा लक्ष्मीविहरणोचितः।
य आदिशठकोपाख्यः तस्मै भवतु मङ्गळम्॥ 8 ॥

यन्मङ्गळाशासनेन यच्छन्मङ्गळमन्वहम्।
श्रीनृसिंहस्सञ्चरति तस्मै भवतु मङ्गळम्॥ 9॥

यत्कटाक्षेण सर्वेऽपि यत्स्थानागतयोगिनः।
श्री नृसिंहदयापूर्णाः तन्मुनेर्मङ्गळं सदा॥ 10॥

यच्छिष्याग्र्यो वैदिकानां सार्वभौमत्वमेत्य च।
रत्नाकरादीन् कृतवांस्तन्मुनेर्मङ्गळं सदा॥ 11॥

नारायणमुनीन्द्राख्यो यच्छात्रो यत्कृपावशात्।
षष्टिप्रबन्धनिर्माता खल्वस्मै मङ्गळं सदा॥ 12॥

‡ श्रीशठारियतीन्द्रादि योगिहृत्पद्मभानवे।
सर्वत्र परिपूर्णायाहोबिलेशाय मङ्गळम्॥ 13॥

‡ पराङ्कुशमुनीन्द्रेण भक्त्यास्मै मङ्गळं कृतम्।
यः पठेत् स भवेद्धन्यः श्रीनृसिंहकृपावशात्॥ 14॥

श्रीरामानुजसिद्धान्तनिर्धारण धुरन्धरः।
आदिवण्शठकोपाख्ययतीन्द्रो जयतात् भुवि॥ 15॥

॥ इति श्रीमदादिवण्शठकोपयतीन्द्र महादेशिक मङ्गळं समाप्तम्॥